# parivRRiDhAShTakam

# પરિવૃઢાષ્ટકમ્

## Document Information

Text title : parivRRiDhAShTakam

File name : parivRRiDhAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka, vallabhaachaarya

Location : doc_vishhnu

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પરિવૃઢાષ્ટકમ્

કલિન્દોદ્ભૂતાયાસ્તટમનુચરન્તી પશુપજાં
રહસ્યેકાં દૃષ્ટ્વા નવસુભગવક્ષોજયુગલામ્ ।
દૃઢં નીવીગ્રન્થિં શ્વથયતિ મૃગાક્ષ્યા હટતરં
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૧॥

સમાયાતે સ્વસ્મિન્સુરનિલયસામ્યં ગતવતિ
વ્રજે વૈશિષ્ટ્યં યો નિજપદગતાબ્જાઙ્કુશયવૈઃ ।
અકાર્ષીત્તસ્મિન્મે યદુકુલસમુદ્ભાસિતમણૌ
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવઢે ॥ ૨॥

હિહીહીહીકારાન્ પ્રતિપશુ વને કુર્વતિ સદા
નમદ્ભહ્મેશેન્દ્રપ્રભૃતિષુ ચ મૌનં ધૃતવતિ ।
મૃગાક્ષીભિઃ સ્વેક્ષાનવકુવલયૈરર્ચિતપદે
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૩॥

સકૃત્સ્મૃત્વા કુમ્ભી યમિહ પરમં લોકમગમ-
શ્ચિરં ધ્યાત્વા ધાતા સમાધિગતવાન્યં ન તપસા ।
વિભૌ તસ્મિન્મહ્યં સજલજલદાલીનિભતનૌ
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૪॥

પરા કાષ્ઠા પ્રેમ્ણાં પશુપતરુણીનાં ક્ષિતિભુજાં
સુદૃક્તાનાં ત્રાસાસ્પદમખિલભાગ્યં યદુપતેઃ ।
વિભુર્યસ્તસ્મિન્મે દરવિકચજમ્બાલજમુખે
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૫॥

દરપ્રાદુર્ભૂતદ્વિજગણમહઃ પૂરિતવને
ચરં કુઞ્જાં રાકારુચિરતરશોભાધિકરુચિ ।
હરિર્યસ્તસ્મિંસ્ત્રીગણપરિવૃતો નૃત્યતિ સદા
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૬॥

સ્ફુરદ્ગુઞ્જાપુઞ્જાકલિતનિજપાદાબ્જવિલુઠત્-
સ્રજિ શ્યામાકામાસ્પદપદયુગે મેચકરુચિ ।
વરાઙ્ગે શ‍ૃઙ્ગારં દધતિ શિખિનાં પિચ્છપટલૈઃ
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૭॥

દુરન્તં દુઃખાબ્ધિં હસિતસુધયા શોષયતિ યો
યદાસ્યેન્દુર્ગોપીનયનનલિનાનન્દકરણમ્ ।
અનઙ્ગઃ સાઙ્ગત્વં વ્રજતિ મમ તસ્મિન્ મુરરિપૌ
રતિપ્રાદુર્ભાવો ભવતુ સતતં શ્રીપરિવૃઢે ॥ ૮॥

ઇદં યઃ સ્તોત્રં શ્રીપરિવૃઢસમીપે પઠતિ વા
શ‍ૃણોતિ શ્રદ્ધાવાન્ રતિપતિપિતુઃ પાદયુગલે ।
રતિં પ્રેપ્સુઃ શશ્વત્કુવલયદલશ્યામલતનૌ
રતિઃ પ્રાદુર્ભૂતા ભવતિ ન ચિરાત્તસ્ય સુદૃઢા ॥ ૯॥

ઇતિ શ્રીવલ્લભાચાર્યકૃતં શ્રીપરિવૃઢાષ્ટકં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*parivRRiDhAShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*